International Journal of Sanskrit Research 2022; 8(2): 291-295

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(2): 291-295
© 2022 IJSR
www.anantaajournal.com
Received: 30-10-2021
Accepted: 06-01-2022

**डॉ. नन्दिघोषमहापात्रः**
सहायकाचार्यः, सर्वदर्शनविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी, उत्कलाः,
उत्तराखंड, भारत

Corresponding Author:
**डॉ. नन्दिघोषमहापात्रः**
सहायकाचार्यः, सर्वदर्शनविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी, उत्कलाः,
उत्तराखंड, भारत

# श्रुतिप्रस्थाने स्मृतिशक्तेः विकासोपायाः

## डॉ. नन्दिघोषमहापात्रः

**सारांश**
रातनभारतीयवैदिकपरम्परा स्मृतिप्राधाना आसीत् । श्रूयते आचार्यशङ्करः सम्पूर्णस्य वेदस्य स्मरणं कृतवान् आसीत्।

अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रविद् ।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात् ।।

परं साम्प्रतिकसमाजे जनानां स्मृतशिक्तिः ह्रासो भवति। तत्र प्रमुखं कारणं भौतिकसंसाधनानामत्यधिकोपयोगः अव्यवस्थितजीवनयापनञ्च। एतादृशानां समस्यानां निराकरणार्थं संस्कृतवाङ्मये उपायाः निर्द्दिष्टाः सन्ति । तत्केवलं दिङ्मात्रमत्र प्रस्तूयते

**कूटशब्दः** प्रस्थानत्रयी, स्मरणशक्तिः प्रपञ्चः, परमानन्दः, विश्वशन्तिः, आतङ्कवादः, चित्तपरिकर्म ।

**प्रस्तावना**

वेदान्तस्य प्रस्थानत्रये श्रुतिप्रस्थानं सर्वप्रामुख्यं भजते। श्रुतिप्रस्थानमित्यनेन उपनिषदः तत्तद्भाष्यसंग्रहादिकं भवति। तत्र स्मृतेः वृद्ध्युपायाः किदृशाः वर्णितास्सन्ति इति विचार्यते। वस्तुतः स्मृतिः इत्यनेन दर्शने ज्ञातविषयस्य पुनः ज्ञानं स्मृतिरिति भवति। परन्तु स्मृतिशक्तिरित्यनेनात्र स्मरणमेव भवति। अर्थात् स्मरणशक्तिवर्द्धनोपायाः इति। कथं वा स्मरणशक्तेः वृद्धिर्भवति, केनोपायेन इत्यादि विचारः।

स्मृतिशक्तेः नाम स्मरणशक्तेः विकासः विना इन्द्रियधारणम् अर्थात् इन्द्रियाणां स्थिरतां विना नैव संपादयितुं शक्ये। यो खलु यावान् इन्द्रियाणि वशीकरोति स खलु तावान् स्थिरो भवति, तस्य स्मरणशक्तेः बृद्धिरपि तथैव भवति। एतदेव कठोपनिषदि मन्त्रेषूच्यते।

यस्त्वविज्ञानवान्भवत्ययुक्तेन मनसा सदा ।
तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ।।[१]

यस्तु बुद्ध्याख्यः सारथिरविज्ञानवान् निपुणोऽविवेकी प्रवृत्तौ च निवृत्तौ च भवति यथेतरो रथचर्यायामयुक्तेन अप्रगृहीतेनासमाहितेन मनसा प्रग्रहस्थानीयेन सदा युक्तो भवति तस्याकुशलस्य बुद्धिसारथेः इन्द्रियाण्यश्वस्थानीयान्यवश्यानि अशक्यनिवारणानि दुष्टाश्वा अदान्ताश्वा इवेतरसारथेर्भवन्ति ।[२]

अर्थात् यः अविज्ञानवान् भवति अर्थात् अमनस्कः सर्वदा कर्यं करोति, सर्वं व्यवहरति तस्य इन्द्रियाणि कस्यचिद्रथस्य दुष्टाश्वा इव आचरन्ति। यथा दुष्टाश्वाः रथं नैव सम्यग् मार्गे नयन्ति किन्तु तद्विपरीतमार्गे नीत्वा सारथिं तथा रथिनं विपदि नयन्ति तथा अमनस्कजनः नैव विचारदौ प्रभवति। किञ्च तस्य लक्ष्यमपि न प्राप्नोति।

एतेन समनस्को यदि पुरुषस्तिष्ठति तेन स विज्ञानवान् भवति, तथा विज्ञानवतः मनुष्यस्य इन्द्रियाणि वशीभूतानि भवन्ति। वशीभूतेन्द्रियैः स सर्वं धारयितुं शक्नोति। तेन स्थिरबुद्धिसम्पन्नस्य तस्य पुरुषः स्मृतिरपि वृद्धिमेति। अत एव उच्यते -

यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा ।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ।।[३]

यस्तु पुनः पूर्वोक्तविपरीतः सारथिर्भवति विज्ञानवान्प्रगृहीतमनः समाहितचित्तः सदा तस्याश्वस्थानीयानीन्द्रियाणि प्रवर्त्तयितुं निवर्त्तयितुं वा शक्यानि वश्यानि दान्ताः सदश्वा इवेतरसारथेः । तस्य पूर्वोक्तस्याविज्ञानवतो बुद्धिसारथेः फलं शास्त्रे उच्यते -

यस्तु विज्ञानवान्भवति समनस्कः सदा शुचिः ।
स तु तत्पदमाप्नोति यसमाद्भूयो न जायते ।।[४]

यस्तु द्वितीयो विज्ञानवान् विज्ञानवत्सारथ्युपेतो रथी विद्वान् इत्येतत्; युक्तमनः समनस्कः स तत एव सदा शुचिः स तु तत्पदमाप्नोति ।

अर्थात् विज्ञानवान् बुद्धिमान् पुरुषः स्थिरमतिमान् धीमान् वा पुरुषः सर्वविधं फलमाप्नोति। धीमतः पुरुषस्य तथा स्मरणशक्तेः विकासोऽपि भवति। तद्विपरितस्य सर्वहानिः श्रुतिः ख्यापयति। यथा -

यस्त्वविज्ञानवान्भवत्यमनस्कः सदाशुचिः ।
न स तत्पदमाप्नोति संसारं चाधिगच्छति ।।[५]

एवं कठोपनिषदि स्मरणशक्तेः विकासोपायाः वर्णिताः। अपि च चित्तस्यैकाग्रोपायाः वर्णिताः। यथा -

यच्छेद्वाङ्ग्नसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि ।
ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि ।।[६]

यच्छेन्नियच्छेदुपसंहरेत्प्राज्ञो विवेकी ; किम् ? वाग्वाचम् । वागत्रोपलक्षणार्था सर्वेषामिन्द्रियाणाम् । क्व ? मनसि। तच्च मनो यच्छेज्ज्ञाने प्रकाशस्वरूपे बुद्धौ आत्मनि । बुद्धिर्हि मन-आदिकरणान्याप्नोतीत्यात्मा प्रत्यक् तेषाम् । ज्ञानं बुद्धिमात्मनि महति प्रथमजे नियच्छेत् । प्रथमजवत् स्वच्छस्वभावकमात्मनो विज्ञानम् आपादयेदित्यर्थः । तं च महान्तम् आत्मानं यच्छेच्छान्ते सर्वविशेषप्रत्यस्तमितरूपेऽविक्रिये सर्वान्तरे सर्वबुद्धिप्रत्ययसाक्षिणि मुख्यात्मनि। एवं पुरुष आत्मनि सर्वं प्रविलाप्य नामरूपकर्मत्रयं यन्मिथ्याज्ञानविजृम्भितं क्रियाकारकफललक्षणं स्वात्मयाथात्म्यज्ञानेन मरीच्युदकरज्जुसर्पगगनमलानीव मरीचिरज्जुगगनस्वरूपदर्शनेनैव स्वस्थः प्रशान्तात्मा कृतकृत्यो भवति ।

वस्तुतः वेदान्ते ज्ञानाधिगमाय एका प्रक्रिया स्वीक्रियते। सा प्रक्रिया वृत्तिः व्यापारादिभिः ज्ञायते। सा वृत्तिश्चतुर्विधा संशयो, निश्चयो, गर्वः, स्मरणमिति । एवंविधवृत्तिभेदेन एकमप्यन्तःकरणं मन इति, बुद्धिरिति, अहङ्कार इति, चित्तमिति च व्याख्यायते । एतदेव विवेकचूडामणिग्रन्थे श्रीशङ्कराचार्येण उक्तम् -

निगद्यतेऽन्तःकरणं मनोधी-
रहंकृतिश्चित्तमिति स्ववृत्तिभिः।
मनस्तु सङ्कल्पविकल्पनादिभि-
र्बुद्धिः पदार्थाध्यवसायधर्मतः।।[७]

अत्राभिमानादहमित्यहंकृतिः
स्वार्थानुसन्धानगुणेन चित्तम्।।[८]

एतदेव श्रीधर्मराजाध्वरीन्द्रेणाप्युक्तं वेदान्तपरिभाषायाम्-

मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम् ।
संशयो निश्चयो गर्वः स्मरणं विषया इमे ।।[९]

यदा अन्तःकरणं चित्ताख्यं वृत्तिविशेषं भवति तदा स्मरणमिति तस्य चित्तस्य विषयो भवति। तेन पूर्वविषयस्मारणमित्यादीनि कर्माणि भवन्ति। अस्य स्मरणस्य कथं वा वृद्धिर्भवति, केनोपायेन विकासो भवति इति जिज्ञास्यविषयः।

यतो हि चित्तस्य विषयः स्मरणं तेन चित्तस्थैर्ये स्मरणस्य विकाशः संभवेत्। अतः चित्तस्य स्थैर्यतासम्पादनं कथं भवेत् तदनुसन्धेयम्। यथा सौम्येकेन मृत्पिण्डज्ञानेन सर्वं मृण्मयं नाम मृत्कार्यं विज्ञातं भवति तथा चित्तस्य स्थैर्यता सम्पादनेन स्मरणस्यापि विकाशः भवेदिति नास्त्यत्र सन्देहः।

चित्तस्यस्थैर्यविषये अद्वैतवेदान्ते बहुत्र वर्ण्यते। चित्तस्य लक्षणं भवति - स्मरणात्मिकान्तःकरणवृत्तिविशेषः। तस्यैव धारणेन स्मरणस्यापि वृद्धिर्भवेत्। एतद्विषये श्रुतिषु बहुधा वर्णनं प्राप्यते। तथाहि छान्दोग्ये -

चित्तमात्मा, चित्तं प्रतिष्ठा, चित्तमुपास्व।[१०]

अर्थात् - चित्तमेव आत्मा भवति। आत्मा इत्यनेनात्र सर्वाधारः, देहस्य सर्वज्ञानानामाधार इति। तदेव प्रतिष्ठा - तेनैवात्मना मानवः प्रतिष्ठां लभते। सर्वत्र स्वास्तित्वं प्रकाशयति। अतः चित्तमुपास्व - अर्थात् चित्तं यदि उपासेत तर्हि सर्वं लब्धुं शक्यते। एतेन तस्य चित्तस्य विषयस्य स्मरणस्यापि वृद्धिर्नितरां सुतरां भविष्यति। इतश्च बराहोपनिषदि –

चित्तमूलं हि संसारस्तत् प्रयत्नेन शोधयेत् इति।[११]

चित्तमेव मूलं संसारस्य, तस्य यत्नेन शोधनं कृत्वा सिद्धिं प्राप्तुं शक्यते। किञ्च अध्यात्मोपनिषदि -

चित्तमूलो विकल्पोऽयं चित्ताभावे न कश्चन।
अतश्चित्तं समाधेहि प्रत्यग्रूपे परात्मनि।। [१२]

चित्तस्य समाधानेन प्रत्यगात्मनः परमात्मनः ज्ञानं भवति। समाधानं च चित्तस्य योगशास्त्रे अभिहितम्। चित्तस्याभावे किमपि नास्ति। चित्तेनैव सर्वव्यवहारः संसारस्य। अतः स्मृतेरपि चित्तसमाधानेन विकासो सर्वथा संभवः।

चित्तमेव हि संसारो रोगादिक्लेशदूषितम्।
तदेव तैर्विनिर्मुक्तं भवान्त इति कथ्यते।। [१३]

महोपनिषदः वचनमिदं चित्तस्य संसारमूलत्वं वर्णयति। चित्तेन रागदोषादिभावाः भवन्ति, तेन मनुष्यः क्षीणो भवति, स्मृत्यादेः विपरिणामश्च तस्य भवति। अतः चित्तस्थैर्यतां सम्पादयित्वा तस्य स्मृतिशक्तेर्विकाशः सम्भवेदिति अस्याभिप्रायः। एतच्चाप्यन्यत्र –

चित्तवृत्तिनिरोधेन नादो ह्यानन्दसंभवः।[१४]

अर्थात् चित्तस्य वृत्तिनिरोधपूर्वकमानन्दस्योद्भावं संभवति। तेनापि स्मृतेः विकाशः संभवः। मैत्रेयोपनिषदि -

चित्तशुद्धिकरं शौचं वासनात्रयनाशनम्।[१५]

वासनात्रयनाशपूर्वकं चित्तस्य शौचतासम्पादनेन स्मरणशक्तेः वृद्धिर्बविष्यति इत्युक्तम्। इतश्च चित्तशुद्ध्या पुरुषस्य सर्ववासनाहानिस्तथा परमात्मन्यवस्थानं, तस्य तावदेव चिरमित्याद्यवस्थापि परिकल्पिता। उक्तञ्च –

चित्तशुद्धिर्भवेद्यावत्तावन्नित्यं चरेत्सुधीः।।[१६]

चित्तशुद्धौ ज्ञानप्राप्तिः, ज्ञानप्राप्तिश्च स्मृतिशक्तेः वृद्धिं सूचयति । यतो हि स्मृतिभ्रंशाद्बुद्धिनाशः अतः बुद्धेः विकाशः स्मृतेः विकाशेनापि व्यतिरेकव्याप्तिबलेन सिद्ध्यति। एतच्चापि उपनिषदि –

चित्तशुद्धौ क्रमाज्ज्ञानं त्रुट्यन्ति ग्रंथयः स्फुटम्।।[१७]

अथोपनिषदि चित्तविषयत्यागात् सुखं तथा विषयभोगाद्दुःखमित्यपि वर्णितम्।

चित्तसत्ता पर दुःखं चित्तत्यागः परं सुखम्।।[१८]

चित्तसत्तां क्षयं नीत्वा चित्तं नाशमुपानयेत्।[१९]

चित्तसत्तेह दुःखाय चित्तनाशः सुखाय।[२०]

किन्तु चित्तस्य स्थिरीकरणेन मनसः धारणेन पुरुषः विवेकी भवति। विवेकिनः पुरुषस्य सर्वसिद्धिर्भवति। विवेकी पुरुषः स्मृतिशक्तिसम्पन्नो भवत्यपि। तथा हि –

चित्तस्य निश्चलीभावधारणं धारणां विदुः।
सोऽहं चिन्मात्रमेवेति चिन्तनं ध्यानमुच्यते।।[२१]

चित्तस्य हि प्रसादेन हन्ति कर्म शुभाशुभम्।
प्रसन्नात्माऽऽत्मनि स्थित्वा सुखमव्ययमश्नुते।।[२२]

चित्तं कारणमर्थानां तस्मिन् सति जगत्त्रयम्।
तस्मिन् क्षीणे जगत्क्षीणम् ।[२३]

अतः स्मृतिशक्तेः विकाशायोपनिषद्युक्तं -

चित्तं च चेतयितव्यं च तेजश्च विद्योतयितव्यम्।[२४]

चित्तं दूरे परित्यज्य योऽसि सोऽसि स्थिरो भव।[२५]

किञ्च शास्त्रबोधितकर्माणि कृत्वा योगोपदिष्टमार्गेण एकाग्रमानसो भूत्वाऽपि स्मृतेः वृद्धिं सम्पादयितुं शक्यते। तदिह वर्ण्यते -

चित्तं ध्यानेन यच्चिन्त्यं शास्त्रदृष्टेन कर्मणा।
योगस्थेनैव मार्गेण ह्येकाग्रमानसो भवेत्।।[२६]

एतच्च चित्तं प्राणेन सम्बद्धमस्ति। यथा कश्चित्पक्षी रज्ज्वाबन्धो भूत्वा डयितुं न शक्यते तद्वन्मनः अपि चित्तसम्बन्धान्मनसः स्थितिः ज्ञेया। तस्मात् मनसंयमी स्वबुद्धिं विकशितुं यतते। उक्तं हि -

चित्तं प्राणेन सम्बद्धं सर्वजीवेषु संस्थितम्।
रज्ज्वा यद्वत्सुसम्बद्धः पक्षी तद्वदिदं मनः।।[२७]

सर्वव्यवहारः सर्वेषामिन्द्रियाणां स्थितिरपि चित्ते तिष्ठति। तेन चित्तेन हि सर्वं साधयितुं शक्यते। स्मृतेः विकासोऽपि भवति । तथा चोक्तं -

चित्ते चलति संसारो निश्चलं मोक्ष उच्यते।[२८]

चित्तोपशान्तिफलदं परमं विद्धिकारणम्।[२९]

स्मृतेः स्मरणं साक्षादायुर्वेदेऽपि वर्ण्यते। स्मृतिशक्तेः प्रयोजनमुद्दिश्य तत्र कथ्यते –

स्मृतिः संसेवनाद्यैश्च धृत्यन्तैरुपलभ्यते।
स्मृत्या स्वभावं भावानां स्मरन् दुःखात् प्रमुच्यते।।[३०]

एवं स्मृतिशक्तिसम्पन्नपुरुषः सर्वं लभते। गुह्यादपि गुह्यतरं तत्त्वं ज्ञातुं प्रभवति। न किञ्चिदवशिष्यते। उक्तं चेतिहासे -

स्मृतेनापिहिता गुहा, शमेनापिहिता गुहा। [३१]

वेदान्ते सम्पूर्णं तत्त्वं परमात्मसम्बन्धी भवति। परमात्मानं साक्षात्कर्त्तुं ये उपायाः भवन्ति ते उपायाः सर्वदा वेदान्तेष्वेवोक्ताः भवन्ति। एवं वेदान्ताध्ययनेन न केवलं परमात्ममसम्बन्धितत्त्वज्ञानं भवति अपि तु तद्विजिज्ञासोः नैके लाभाः भवन्त्यपि। यथा कालिदासीयवचनं - याञ्चामोघा वरमधिगुणे नाधमे लब्धकामाः इति सर्वगुणसम्पनानां कृते याचनया नैव हानिर्जायते , तथा सर्वज्ञानाकररूपोपनिषदां सेवनेन परमप्रययोजनरूपस्य मोक्षस्याप्तिस्तु भवति किन्तु तदभावे नूनं व्यावहारिकस्य पुरुषस्यान्यल्लाभो भवत्येव। उपनिषदुपायसेवमानपुरुषस्य चित्तैकाग्यं सम्भवति। तेन तस्य सद्बुद्धिरुपजायते। स्मरणशक्तेः वृद्धिर्भवति । स तु विज्ञानवान् भवति। एवं नैके अवान्तरप्रयोजनसिद्धिर्भवतीत्यलम् ।
स्मृतिशक्तेः विकासाय इतोऽपि वेदान्ते उपायाः विद्यन्ते । तन्निर्णयाय अधिकारी इति विषयस्यान्वेषणं कर्त्तव्यम्।
वेदान्ते साधनचतुष्टयसम्पन्नप्रमाता अधिकारी भवति । तस्य अधिकारी इत्यस्य मुख्यगौणभेदेन प्रयोजनद्वयं सिद्ध्यति। मुख्यप्रयोजनं तावत् अधिकारिणा ब्रह्मजिज्ञासा कर्त्तव्या भवति । तेन परमप्रयोजनस्य मोक्षस्य सिद्धिर्भवति। गौणप्रयोजनं तु अधिकारी यदि साधनचतुष्टयसम्पन्नो भवति तेन सः व्यवहारकुशली भवति । तथा च अन्येपि बाह्याभ्यन्तरशौचादिलाभाः तस्य भवन्ति । चित्तस्य एकाग्रतासम्पादनपूर्वकं सः मानवेषु स्वात्मानं श्रेष्ठं साधयितुं प्रभवति । अतः साधनानि वर्णितानि। तथा हि-
जीवः ब्रह्मास्वादेन सह सम्पूर्णं जगदिदं ब्रह्ममयमिति परिकल्पयितव्यमिति अद्वैतवेदान्तसिद्धान्तः । तदर्थं साधनानि चत्वारि परिकल्पितानि । यथा - नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, शमादिषट्कसम्पत्तिः, मुमुक्षुत्वञ्च । तदुक्तम्-

नित्यानित्यवस्तुविवेकस्तावद्- ब्रह्मैव नित्यं वस्तु ततोऽन्यदनित्यमिति विवेचनम् ।
ऐहिकानां स्रक्चन्दनवनितादिविषयभोगानां कर्मजन्यतयाऽनित्यत्ववदामुष्मिकाणाम-
प्यमृतादिविषयभोगानामनित्यतया तेभ्यो नितरां विरतिरिहामुत्रार्थफलभोगविरागः ।
शमादयस्तु - शम-दम-उपरति-तितिक्षा-समाधान-श्रद्धाख्याः।
शमः तावच्छ्रवणादिव्यतिरिक्तविषयेभ्यो निवर्तनम् । बाह्येन्द्रियसंयमः ।
दमः अन्तरिन्द्रियसंयमः ।
उपरतिः निवा|ततानामेतेषां तद्व्यतिरिक्तविषयेभ्य उपरमणमुपरतिः अथवा विहितानां कर्मणां विधिना परित्यागः ।
तितिक्षा - शीतोष्णादिद्वन्द्वसहिष्णुता।
गुरूपदिष्टवेदान्तवाक्येषु विश्वासः श्रद्धा ।
निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम् । मुमुक्षुत्वं मोक्षेच्छा ।[३२]

अत्र प्रमाता नाम यः ब्रह्मात्मैक्यं सम्यग् जानाति । एवंभूतः प्रमाता अधिकारी शान्तो दान्तः इत्यादिश्रुतेः। उक्तं च -

प्रशान्तचित्ताय जितेन्द्रियाय प्रहीणदोषाय यथोक्तकारिणे ।
गुणान्वितायानुगताय सर्वदा प्रदेयमेतत्सततं मुमुक्षवे ।।[३३] इति

एवं प्रकारेण वेदान्तशास्त्रस्याधिकारी स एव भवति यः सकलवेद-वेदान्त-ब्रह्मण-आरण्यकोपनिषदादीनां सम्यगध्ययनं कृत्वा सत्कर्मणि प्रवृत्तो भवति, असत्कर्मणश्च निवृत्तो भवति, तथा च साधनचतुष्टयसम्पन्नो अस्ति । एतादृशः अधिकारी शास्त्रो दान्तादिगुणवान् सर्वविधकार्यकुशली सर्वं साधियितुं शक्नोति। शान्तो दान्तादिगुणयुक्तः अधिकारी चित्तस्य स्थैर्यं सम्पादयति। तेन तस्य चित्तस्य यो विषयः स्मरणं, तस्यापि विकासः संभवति। कथमित्युक्ते - स्थिरचित्तस्य अधिकारिपुरुषस्य विषयादिषु तथासक्तिर्न भवति, आसक्तिरहितस्य तस्य सर्वं

विषयग्रहणं साक्षात्सम्यक्तया भवति। तथैव धीशक्तिबृद्धिरपि भवतीति निष्कर्ष:।

**पादटिप्पणी** -

| | |
|---|---|
| १. क.उ. १/३/५ | २. क.उ.भा. |
| ३. क.उ. १/३/६ | ४. क.उ. १/३/८ |
| ५. क.उ. १/३/७ | ६. क.उ. ३-१३ |
| ७. वि.चू.- १५ | ८. वि.चू.- १६ |
| ९. वे.प.पृ. २३७ | १०. छा.उ. ७/५/२ |
| ११. ब.उ. ३/२१ | १२. आत्मोपनिषद् - २६ |
| १३. महो.४/६६ | १४. गान्धर्वो.६ |
| १५. मैत्रे.२/९ | १६. ना.प.५/४७ |
| १७. पा.ब्र.४२ | १८. अ.पू.५/११७ |
| १९. अ.पू.४/१५ | २०. अ.पू.४/१६ |
| २१. अवधू.४ | २२. मैत्रे.१/११ |
| २३. यो.शि.३/२१ | २४. प्र.उ.४/८ |
| २५. महो.५/५१ | २६. दुर्वासो.२/५ |
| २७. यो.सि.१/५९ २८. यो.शि.६/५८ | |
| २९. अ.पू.४/४५ | ३०. आयु.१९ |
| ३१. इतिहा.१६ | ३२. वे.सा. पृ.सं. ७-९ |
| ३३. उपदेशसाहस्री - १६/७२ | |

**सन्दर्भग्रन्थाः–**


1. वेदान्तविमर्श डॉ. ओभिमन्यु परमलपब्लिकेसन्स, दिल्ली १९६१
2. महोपनिषद् गीताप्रेस गोरखपुर
3. ईशादि नौ उपनिषद् गीताप्रेस, गोरखपुर २०१० (शाङ्करभाष्यार्थ)
4. ईशाद्यष्टोत्तरशतोपनिषदः वासुदेवलक्ष्मणपणशीकरः चौखम्बा विद्याभवन, वाराणसी २००२
5. उपनिषत्संग्रहः श्रीनगेन्द्रप्रसादजैन मोतिलाल बनारसी दास, दिल्ली १९७०
6. उपनिषद्वाक्यमहाकोषः मोतिलाल वनारसी दास, दिल्ली १९६३
7. कठोपनिषद् गीताप्रेस, गोरखपुर २०१०
8. छान्दोग्योपनिषद् गीताप्रेस,गोरखपुर २०१०
9. दार्शनिकनिबन्धाः डॉ. सुकान्तकुमारसेनापतिः मान्यता प्रकाशन, दिल्ली २०११
10. भारतीयदर्शन डॉ. उमेशमिश्रः उत्तरप्रदेश हिन्दी संस्थान, लखनऊ २००३
11. भारतीयदर्शन बलदेव उपाध्याय शारदा मन्दिर,वाराणसी २००९
12. भारतीयदर्शन आलोचन और अनुशीलन चन्द्रधर शर्मा मोतिलाल वनारसी दास, दिल्ली २००४
13. महाभारतम् भगवान् व्यासः गीताप्रेस, गोरखपुर २००३
14. वेदान्तसारः सदानन्दयतिः चौखम्बा विद्याभवन, वाराणसी २००२ (विद्वन्मनोरञ्जिनी टीका)
15. श्रीमद्भगवद्गीता भगवान् व्यास: गीताप्रेस, गोरखपुर